# Gangakavacham

# ગઙ્ગાકવચમ્

## Document Information

Text title : Gangakavacha

File name : gangAkavacham.itx

Category : devii, nadI, kavacha, devI

Location : doc_devii

Transliterated by : Shree Devi Kumar shreeshrii at gmail.com

Proofread by : Shree Devi Kumar shreeshrii at gmail.com

Latest update : October 26, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 26, 2019

*sanskritdocuments.org*

# ગઙ્ગાકવચમ્

નારદ ઉવાચ -
બ્રહ્મન્ ! કેન વિધાનેન સર્વપાપક્ષયો ભવેત્ ।
કથં રક્ષેત્સુરશ્રેષ્ઠ સાધકાનાં સુરાપગા ॥ ૧॥

બ્રહ્મોવાચ -
સાધુ સાધુ ત્વયા પુત્ર ! સાધુ કર્મ પ્રકાશિતમ્ ।
કવચં જહ્નુકન્યાયા ત્રિષુ લોકેષુ દુર્લભમ્ ॥ ૨॥

અપ્રકાશ્યં ચ યદ્ગોપ્યમતસ્તત્ત્વવધાર્યતામ્ ।

અસ્ય શ્રી ગઙ્ગાકવચમન્ત્રસ્ય નારાયણઋષિરનુષ્ટુપ્છન્દઃ
સર્વતીર્થોત્તમા ગઙ્ગાદેવતા ગં બીજં ગાઃ શક્તિઃ અવ્યક્તં કીલકં
શ્રીગઙ્ગાપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।

અથ ધ્યાનં -
શુભ્રામ્ભોજશશિપ્રભાં શશિમુખીં સ્વક્ષામ્બુજાક્ષીં પરાં
મુક્તાહારલસત્કુચાં મણિમયૈરાભૂષિતાં ભૂષણૈઃ ।
કઞ્જસ્વર્ણઘટીવરાભયકરાં શ્વેતામ્બરાડમ્બરાં
પદ્મોત્પીઠગતાં સુધાસમુદિતાં શ્રીદેવભૂષાં ભજે ॥ ૧॥

વન્દે દેવતરઙ્ગિણીં પ્રતિદિનં બ્રહ્માણ્ડમાખણ્ડિનીં
શમ્ભોર્મસ્તકમણ્ડિનીં મુરરિપોરઙ્ઘ્ર્યમ્બુજાસેવિનીમ્ ।
કલ્યાણોત્સવકારિણીં કલિમલોન્મૂલત્વનિર્મૂલિની
મોક્ષદ્વારકપાટપાટનકરીં નિત્યં ચિદાનન્દિની ॥ ૨॥

અથ કવચં -
શિરો મે પાતુ સા ગઙ્ગા દિવ્યાચ્યુતાઙ્ઘ્રિચ્યુતા ।
ભાલં ભાગીરથી પાતુ નેત્રે ચ જહ્નુનન્દિની ॥ ૩॥

શ્રુતી મે જાહ્નવી પાતુ ઘ્રાણયુગ્મં સુરાપગા ।

રસનાં પાતુ મે નિત્યં ગઙ્ગા પાપપ્રણાશિની ॥ ૪॥

વદનં સકલં પાતુ સદા મન્દાકિની મમ ।
સ્કન્ધૌ પાતુ ચ મે બાહૂ ગઙ્ગા સાગરગામિની ॥ ૫॥

કરૌ રક્ષતુ સા ગઙ્ગા શમ્ભુમસ્તકમણ્ડિની ।
હૃદયં નાભિમધ્યં ચ પાતુ દેવનદી મમ ॥ ૬॥

કટિદ્વયં સદા પાતુ બ્રહ્માણ્ડખણ્ડિની મમ ।
જાનુની જહ્નુજા પાતુ પાયાદૂરૂં ત્રિમાર્ગગા ॥ ૭॥

ગુલ્ફયુગ્મં સદા પાતુ સા મે શર્મપ્રદાયિની ।
પ્રપદં પાતુ મે નિત્યં કલિકલ્મષનાશિની ॥ ૮॥

કાશીતલગતા યા ચ કાલિન્દીસઙ્ગમા ચ યા ।
સા પાતુ મમ સર્વાઙ્ગં ગઙ્ગા ગગનમેખલા ॥ ૯॥

નિર્જરૈર્વન્દિતા યા ચ ચતુર્વર્ગફલપ્રદા ।
તસ્યા ઇદં ચ ગઙ્ગાયાઃ કવચં પરમાદ્ભુતમ્ ॥ ૧૦॥

અથ ફલશ્રુતિઃ -
અનન્તવ્યાધિવિધ્વંસિ કીર્તિબુદ્ધિપ્રવર્દ્ધનમ્ ।
શોકદુઃખપ્રશમનં સર્વરક્ષાકરં નૃણામ્ ॥ ૧૧॥

શત્રોર્વિનાશનં શશ્વત્સુખસમ્પત્પ્રવર્ધનમ્ ।
યોઽધીયાત્ કવચં ચૈતન્મુક્તપાપો ભવેચ્ચ સઃ ॥ ૧૨॥

એકકાલં દ્વિકાલં ચ ત્રિકાલં ચ પઠેત્તુ યઃ ।
પઠેદ્યો વૈ શતાવૃત્ત્યા માસમેકં નિરન્તરમ્ ॥ ૧૩॥

ધૃત્વેદં કવચં કણ્ઠે ગચ્છેદ્યો યત્ર કુત્રચિત્ ।
સ્વપ્ને મૂર્તિમયીં ગઙ્ગાં વરદાં સોઽપિ પશ્યતિ ॥ ૧૪॥

ધનધાન્યસમાયુક્તઃ પુત્રપૌત્રસમન્વિતઃ ।
ત્રિષુ લોકેષુ પૂજ્યઃ સ્યાદસ્ય પાઠાન્ન સંશયઃ ॥ ૧૫॥

શ્ૃણુયાત્પરયા ભક્ત્યા વાચ્યમાનં નરોત્તમઃ ।
સોઽપ્યઘૌઘવિનિર્મુક્તો જીવન્મુક્તો ભવેચ્ચ યઃ ॥ ૧૬॥

દુર્ભિક્ષે દુર્ગબન્ધે વિષમજલચયે કાનને દુષ્ટચૌરૈઃ
દીપ્તે વહ્નિપ્રદાહે પ્રબલરિપુભયે રાજ્યદુઃખે પ્રવૃત્તે ।

સ્મૃત્વા દેવીં ચ ગઙ્ગાં ત્રિભુવનજનનીં વા પઠેદ્ યો હિ ચૈતત્
તૈસ્તૈર્દુઃખૈર્વિમુક્તો સપદિ સ મનુજો જાયતે સત્યમેતત્ ॥ ૧૭॥

કુલીનાય ચ દાતવ્યં ગઙ્ગાભક્તિપરાય ચ ।
વિષ્ણુભક્તાય શાન્તાય શ્રદ્ધાનાય સર્વદા ॥ ૧૮॥

કુશિષ્યાય ન દાતવ્યં દુષ્ટાય ચ વિશેષતઃ ।
દત્વાઽભક્તાય પુત્રાય નેદં ફલપ્રદં ભવેત્ ॥ ૧૯॥

સાધકાય ચ શાન્તાય ગુરોરાજ્ઞાનુવર્તિને ।
દાતવ્યં ચ ત્વયા તાત દત્વાઽનન્તફલં ભવેત્ ॥ ૨૦॥

ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે બ્રહ્મનારદસમ્વાદે
શ્રીગઙ્ગાકવચં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Shree Devi Kumar shreeshrii at gmail.com

*Gangakavacham*

pdf was typeset on October 26, 2019

Please send corrections to *sanskrit@cheerful.com*